ಕರ್ನಾಟಕ ಪ್ರೌಢಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ
ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು–560003.

**KARNATAKA SECONDARY EDUCATION EXAMINATION BOARD**
Malleshwaram, Bengaluru – 560003.

**ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ – 2021-22**
**MODEL QUESTION PAPER - 2021-22**

**ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ – ಸಂಸ್ಕೃತ** | **ವಿಷಯ ಸಂಕೇತ : 67-S**
**Subject : THIRD LANGUAGE SANSKRIT** | **Subject Code : 67-S**
**ಅವಧಿ : 3 ಗಂಟೆ** | **ಗರಿಷ್ಠ ಅಂಕಗಳು : 80**
**Time : 3 hrs.** | **Max. Marks : 80**

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**
**Regular Fresh**

---

## परीक्षार्थिनां सामान्यसूचना:

1) अस्मिन् प्रश्नपत्रे अष्ठत्रिंशत् (38) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति।

2) इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति। परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत। प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति पर्यालोचयत।

3) वस्तुनिष्ठनां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया:।

4) प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति।

5) प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति। पञ्चदशनिमेषा: प्रश्नपत्रस्य पठनार्थं निर्धारिता: सन्ति।

I. **अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत।** 8 x 1 = 8

1. **'महाबलः' अस्य समानार्थकं पदम् इदम् भवति ।**
   A. गणेशः
   B. इन्द्रः
   C. शिवः
   D. चन्द्रः

2. **'उपकारः' अस्य विरुद्धार्थकं पदम् इदं भवति ।**
   A. परोपकारः
   B. अपकारः
   C. प्रत्युपकारः
   D. ममकारः

3. **'भारतस्य' अत्र एषा विभक्तिः भवति ।**
   A. प्रथमाविभक्तिः
   B. तृतीयाविभक्तिः
   C. पञ्चमीविभक्तिः
   D. षष्ठीविभक्तिः

4. **'कुरुक्षेत्रस्य' अत्र इदम् वचनं वर्तते ।**
   A. अन्यवचनम्
   B. द्विवचनम्
   C. एकवचनम्
   D. बहुवचनम्

5. **'प्रेषयति' अत्र एषः लकारः भवति ।**
   A. लट्लकारः
   B. लृट्लकारः
   C. लङ्लकारः
   D. लोट्लकारः

6. **'गच्छामि' अत्र एषः पुरुषः भवति ।**

A. प्रथमपुरुषः

B. मध्यमपुरुषः

C. उत्तमपुरुषः

D. अन्यपुरुषः

7. **'भगवती <u>विराजमाना</u> अस्ति' अत्र रेखाङ्कितपदे एषः प्रत्ययः भवति ।**

A. क्तप्रत्ययः

B. शानच्प्रत्ययः

C. तुमुन्प्रत्ययः

D. ल्यप्प्रत्ययः

8. **अत्र शतृप्रत्ययान्तं पदम् इदं भवति ।**

A. पठन्

B. रक्षितवान्

C. प्रणम्य

D. लिखित्वा

**II. चतुर्थ पदं लिखत।** **4 x 1 = 4**

9. मधुसूदनः – श्रीकृष्णः :: पवनपुत्रः ........................

10. पुण्यपीयूषपूर्णाः – सन्तः :: सदयम् : ...........................

11. इन्द्रः – शक्रः :: अङ्गराजः ..............................

12. अर्जुनः – पार्थः :: ज्ञानी : ................................

**III. एकवाक्येन उत्तरं लिखत।** **4 x 1 = 4**

13. कर्णार्जुनयोः कीदृशं युद्धं प्रवृत्तम् ?

14. कालपर्ययात् का क्षयं गच्छति ?

15. भारतीयान् अस्मान् का बध्नाति ?

16. कर्णस्य सारथि: क: ?

**IV. दित्रै: वाक्यै: उत्तरं लिखत।** **4 x 2 = 8**

17. विश्वसंस्कृतपुस्तकमेलायां के के अंशा: आसन् ?

18. एकाग्रताया: विषये विवेकानन्द: किम् अवदत् ?

19. कति विधा: जना: देवं भजन्ते ? ते च के ?

20. गणेश: कीदृश: ?

**अथवा**

शारदा कीदृशी ?

**V. संस्कृतभाषया अनुवादं करुत।** **1 x 2 = 2**

21. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

**VI. कर्नाटक भाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** **1 x 2 = 2**

22. गोदावरीनदीतीरे विशाल: शाल्मलीतरु: अस्ति। तत्र अनेके पक्षिण: निवसन्ति।

**VII. 23. विग्रहवाक्यं लिखत।** **1 x 2 = 2**

(a) शूलपाणि:।

(b) राघवेन्द्र:।

**अथवा**

**समस्तपदं लिखत।**

(a) वृक्षस्य समीपम् = ............................

(b) चन्द्र: शेखरे यस्य स: = .......................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत।** **1 x 2 = 2**

24. पदारविन्दम्।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत।** **2 x 3 = 6**

25. "गच्छ अद्य अहं पुस्तकं न दास्यामि"।
    कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. "भवतः का गतिः भवेत्"।
    कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X. 27. सन्धिं विभज्य नाम लिखत।** **1 x 3 = 3**

(a) हरिरेव।

(b) तथैव।

(c) बालस्तत्र।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत।** **1 x 3 = 3**

28. लघ्वी पुरा वृद्धिमती च पश्चात्।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत।** **1 x 3 = 3**

29. भासः।

**अथवा**

डा।। बा. श्री रामकृष्णराव्।

**XIII. पद्यपाठस्य नाम विलिख्य, तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 x 3 = 9**

30. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
    तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।

31. हिमालयो नः पूज्यः शैलः
    पूज्यनदी सा गङ्गाम्बा।
    साहित्यं नः सङ्गीतमपि
    भाषा भेदेऽप्येकमिह।।

32. शीलं शौर्यमनालस्यं पाण्डित्यं मित्रसङ्ग्रहः।
    अचोरहरणीयानि पञ्चैतान्यक्षयो निधिः।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत।** **1 x 3 = 3**

33. गुरवे .................................................................. ।

..................................................................नमः ।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया आङ्ग्लभाषया, संस्कृतभाषया वा लिखत।** **2 x 4 = 8**

34. विश्वसंस्कृतपुस्तकमेलायाः वैभवं वर्णयत।

35. 'उभयभारती' इति कथाभागं सङ्गृह्य लिखत।

**अथवा**

'विक्रमः वेतालश्च' इति कथाभागं सङ्गृह्य लिखत।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नात् उत्तरत।** **1 x 4 = 4**

36. हंसस्य वर्णः शुभ्रः। काकस्य वर्णः कृष्णः। एकदा कश्चित् काकः तडागस्य तीरं गच्छति। सः तत्र हंसं पश्यति। सः वदति – "अहो! हंसः कीदृशः शुभ्रः अस्ति। अहम् अपि शुभ्रः भवामि।" अनन्तरं सः काकः जलाशयस्य जलेन निजं शरीरं प्रक्षालयति। तदा काकः पाषाणस्य खण्डेन स्वशरीरं घर्षति। वारं-वारं घर्षति सः तथापि कृष्णः वर्णः शुभ्रः न भवति। घर्षणेन काकस्य शरीरे तीव्रा वेदना भवति। अन्ते काकः पञ्चत्वं गच्छति। अहो! काकस्य मूर्खता।

**प्रश्नाः**

i) हंसस्य वर्णः कः?

ii) काकस्य वर्णः कः?

iii) कस्य शरीरे तीव्रा वेदना भवति?

iv) काकः केन स्वशरीरं घर्षति?

**XVII. 37. दशवाक्यैः प्रबन्धं लिखत।** **1 x 4 = 4**

i) परिसरमालिन्यम्।

**अथवा**

ii) दूरदर्शनम्।

**XVIII. पत्रं लिखत।** **1 x 5 = 5**

38. तुमकूरुमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा अग्रजस्य विवाहार्थं दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।

**अथवा**

शैक्षणिकप्रवासार्थं धनं प्रेषयितुं सम्प्रार्थ्य पितरं प्रति पत्रं लिखत।